स्नाःसु च निर्विषाः ॥ भवति चात्र ॥ क्षेत्रेषु विचरन्त्येताः सलिलेषु सुगन्धिषु । न च सङ्कीर्णचारिण्यो न च पङ्केशयाः सुखाः । तासां प्रग्रहणमार्द्रचर्म्मणान्यैर्वा प्रयोगैर्गृह्णीयात् । अथैता नवे महति घटे सरस्तडागोदकपङ्कमावाप्य निदध्यात् । भक्ष्यार्थं चासामुपहरेच्छैवलं वल्लूरमौदकांश्च कन्दांश्चूर्णीकृत्य, शय्यार्थं तृणमौदकानि च पत्राणि, त्र्यहात्त्र्यहाच्चान्यज्जलं भक्ष्यं च दद्यात् सप्तरात्रात्सप्तरात्राच्च घटमन्यं संक्रामयेत् । भवति चात्र । स्थूलमध्याः परिक्लिष्टाः पृथ्व्यो मन्दविचेष्टिताः । अग्राहिण्योऽल्पपायिन्यः सविषाश्च न पूजिताः"। अधिकमसृग्विमोक्षणशब्दे ५६१ पृष्ठे दृश्यम् ।

**अस्रफला(ली)** स्त्री अस्रमिव लोहितं फलमस्याः । सल्लकीवृक्षे । भस्त्रादिपूर्व्वकत्वाभावेन फलान्तस्य प्रामादिकः टाप् जातित्वात् ङीबेव युक्तः ।

**अस्रमातृका** स्त्री अस्रस्य रुधिरस्य मातेव पोषिका संज्ञायां कन् । अशितान्नादेः रसरूपे देहस्थे प्रथमे धातौ ।

**अस्ररोधिनी** स्त्री अस्रं क्षतजमाशु रुणद्धि रुध–णिनि । लज्जालुलतायाम् ।

**अस्रवत्** त्रि० न स्रवति स्रु–शतृ न०त० स्त्रियां ङीप् । १स्रवद्भिन्ने अक्षरिते "अनागसमस्रवन्तीमारुहेमाम्" ऋ० १०, ६३,१०, अस्रमस्त्यस्य मतुप् मस्य वः । २रुधिरयुक्ते त्रि०स्त्रियां ङीप् अस्रवती । सौ अस्रवान् इति भेदः ।

**अस्रविन्दुच्छदा** स्त्री अस्रविन्दुः रुधिरविन्दुरिव छदो दलं यस्याः । लक्ष्मणानामके वृक्षे ।

**अस्रार्जक** पु० अस्रं रुधिरं सेवनेनार्ज्जयति अर्ज्ज–ण्वुल् । १श्वेततुलसीवृक्षे । २रुधिरोत्पादके रसे च यथाऽस्य रक्तोत्पादकत्वं तथोक्तमसृक्करशब्दे ३शोणितपादकमात्रे त्रि० ।

**अस्रि** स्त्री अस–क्रि । अश्रशब्दार्थे कोणे अश्रिशब्दवत् समासान्तभाक् । चतुरस्रशोभीत्यादि तच्छब्दे उदा० दृश्यम् ।

**अस्रिध्** त्रि० न स्रेधते स्रिध–क्विप् न०त० । अच्योतने "मित्रमदितिं दक्षमस्रिधम्" यजु० २५,१५ ।

**अस्रु** न० अस्यते क्षिप्यते अस–रु । चक्षुर्जले अस्य तालव्यान्ततापि "स्रुत्वास्रुत्वास्रुधारां त्यजतीति" कीचकवधः ।

**अस्रेमन्** त्रि० स्रिव–मनिन् गुणवलोपौ । १प्रशस्ये निरु० । २क्षयहिते च "अमर्त्यासोऽस्रेमाणं तरणिम्" ऋ० ३,२९,१३ । "अस्रेमाणं क्षयिरहितम् भा० ।

**अस्व** त्रि० नास्ति स्वन्धनमस्य । १निर्द्धने । स्वः स्वकीयः न० त० । २स्वकीयभिन्ने त्रि० । एतदर्थेऽस्य सर्व्वनामतया अकच् । अस्वकः स्त्रियां तु नित्यमत इत्त्वम् अस्विका ।

**अस्वच्छन्द** त्रि० विरोधे न०त० । स्वच्छन्दभिन्ने पराधीने ।

**अस्वजाति** त्रि० न स्वस्यैव जातिर्यस्य । भिन्नजातौ यथा विप्रस्य क्षत्रियादि

**अस्वतन्त्र** त्रि० विरोधे न०त० । स्वाधीनभिन्ने पराधीने । "अस्वतन्त्रा स्त्री पुरुषप्रधाना इति" वसि० । तस्या अस्वातन्त्र्यञ्च तत्रैव दर्शितम् "पिता रक्षति कौमारे भर्त्ता रक्षति यौवने । पुत्रश्च स्थाविरे भावे न स्त्री स्वातन्त्र्यमर्हति" तथा पुत्रादीनामपि जन्माधीनं स्वत्वमिति स्थावरधनादेर्यथेष्टविनियोगे पित्रादेरस्वातन्त्र्यमिति मिताक्षरायाम् व्यवस्थापितं यथा "तस्मात्पैतृके पैतामहे च द्रव्ये जन्मनैव स्वत्वम् । तथापि पितुरावश्यकेषु धर्मकृत्येषु वाचनिकेषु प्रसाददानकुटुम्बभरणापद्विमोक्षादिषु च स्थावरव्यतिरिक्त द्रव्यविनियोगे स्वातन्त्र्यमिति स्थितम् । स्थावरे तु स्वार्जिते पित्रादिप्राप्ते च पुत्रादिपारतन्त्र्यमेव । "स्थावरं द्विपदञ्चैव यद्यपि स्वयमर्ज्जितम् । असंभूय सुतान्सर्वान् न दानञ्च च विक्रयः"।"ये जातायेऽप्यजाताश्च ये च गर्भे व्यवस्थिताः । वृत्तिञ्च तेऽभिकाङ्क्षन्ति न दानञ्च च विक्रयः" इत्यादि स्मरणात् । अस्यापवादः "एकोऽपि स्थावरे कुर्य्याद्दानाधमनविक्रयम् । आपत्काले कुटुम्बार्थे धर्म्मार्थे च विशेषतः" इति । अस्यार्थः । अप्राप्तव्यवहारेषु दानानुज्ञानादावसमर्थेषु वा तथाविधेष्वविभक्तेष्वपि सर्व्वकुटुम्बव्यापिन्यामापदि तत्पोषणे चावश्यकर्त्तव्ये स्थावरस्य दानाधमनविक्रयमेकोपि समर्थः कुर्य्यादिति" । यत्तु वचनम् । "अविभक्ता विभक्तावा सपिण्डाः स्थावरे समाः । एकोह्यनीशः सर्व्वत्र दानाधमनविक्रये" इति । तदप्यविभक्तेषु द्रव्यस्य मध्यस्थत्वादेकस्यानीश्वरत्वात्सर्व्वाभ्यनुज्ञा अवश्यं कार्य्या विभक्तेषु तु तदुत्तरकालं विभक्ताविभक्तसंशयव्युदासाय व्यवहारसौकर्य्याय च सर्वाभ्यनुज्ञानं न पुनरेकस्यानीश्वरत्वेन अतो विभक्तानामनुमतिव्यतिरेकेणापि व्यवहारः सिध्यत्येवेति व्याख्येयम्" मिता० व्य०अ० ।

**अस्वन्त** न० असूनाम् अन्तो यस्मात् ५ब० । १चुल्ल्यां तस्याः प्राणिवधहेतुतया सूनास्थानरूपत्वात् तथात्वम् । सुष्ठु न अन्तो यस्य । २अशुभोदर्के त्रि० । ६त० । ३मरणे पु० ।

**अस्वप्न** पु० नास्ति स्वप्नोनिद्रा यस्य । १देवे । २निद्रारहिते त्रि० । देवानां स्वप्नावस्थाराहित्यमुक्तम् शत०ब्रा० । यथा "न वै देवाः स्वपन्त्यनवरुद्धो वा एतस्यास्वप्नो भवति" दिवास्वप्नाभावेऽपि रात्रौ स्वप्नवतोऽस्वप्नत्वमुक्तम् भा० शा०प०